भागश्च एकदेशः दायादग्राह्यधनाद्यंश्च ७ब० । तच्छून्ये पूर्ब्बे निर्दाये च त्रि०।"यो ज्येष्ठो विनिकुर्व्वीत लोभाद्भ्रातॄन् यवीयसः। सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः"मनुः "यं भागिनं निर्भजन्त्यथ यमभागं निर्भजन्ति" शत०ब्रा० ।

**अभागिन्** त्रि० न भागी स्त्रियां ङीप् । १ अधिकारानर्हे क्लीवपतितादौ । २ भागोभाग्यम् । तच्छून्ये च । "यमात्मानं नविद्युरभागिन" इति कठ उ० ।

**अभाग्य** न० अप्राशस्त्ये न०त०। १ दुष्टभाग्ये । न०ब० । २ दुष्टभाग्यवति त्रि० ।[गुणद्वयोरभाजनम्" का०प्र० ।

**अभाजन** न० न०त० । अनाधारे 'दीधीवेवीसमः कश्चिद्

**अभार्य्य** पु०नास्ति भार्य्या तत्सम्बन्धो वा यस्य । १भार्य्याहीने २ शास्त्रनिषिद्धभार्य्यासम्बन्धे नैष्ठिकब्रह्मचारिप्रभृतौ च । "अतिष्टद्वानभार्य्यांश्च क्षपिसक्तान्" नृपस्य च उ०त० का०प०। 'अभार्य्यान् शास्त्रनिषिद्धभार्य्यासम्बन्धान्" रघु०

**अभाव** पु० न भावः।भावभिन्ने सत्त्वेन प्रतीत्यनर्हे वैशेषिकोक्ते सप्तमपदार्थे भावभिन्नत्वमभावत्वमिति बहवः । भावभेदाश्रयरूपत्वस्य तल्लक्षणस्य अभावविशेषघटितत्वेन अन्योन्याश्रयदोषग्रस्ततया अभावत्वमखण्डोपाधिरिति नव्याः । अभावश्च भावाभावसाधारणाश्रयः घटाभावस्य पटे पटाभावदौ च सत्त्वात् स च भावातिरिक्तः कश्चित् पदार्थ इत्याधुनिका वैशेषिका नैयायिकाश्च उररीचक्रुः । सूत्रकृता तु "द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" इति षडेव पदार्थाः कण्ठत उक्ताः । अत एव'न वयं षट्पदार्थवादिनः" इति सांख्यसूत्रे षट्पदार्थीस्वीकारस्तेषां सूचितः । आधुनिकास्तु घटोनास्तीत्यादिप्रतीत्यन्यथानुपपत्त्या पदार्थान्तरमभावं कल्पयन्ति । प्राभाकरास्तु अभावस्याधिकरणस्वरूपत्वमङ्गीचक्रुः । तेषामयमाशयः "मानाधीना मेयसिद्धिरित्युक्तेः अभावस्यातिरिक्तस्य सिद्धौ प्रमाणं वक्तव्यम् न तावत् प्रत्यक्षम्, अभावस्य रूपाद्यभावेन इन्द्रियसन्निकर्षाभावात् तदयोग्यत्वात् न च इन्द्रियसंयुक्तविशेषणता तत्सन्निकर्षः भूतलादौ चक्षुरादिसन्निकर्षसत्त्वेऽपि तत् स्वरूपविशेषणताया अव्यावर्त्तकत्वात् अन्यथा घटाभाव प्रत्यक्षकाले पटाद्यभावप्रत्यक्षस्य दुर्वारत्वात् भूतलादिस्वरूपस्यानुगमात् तुल्ये सन्निकर्षरूपे विशेषणता सम्बन्धे विनिगमनाभावेन नियामकत्वाभावात् । अथ ज्ञानलक्षणया यस्य ज्ञानं, तस्यैवाभावस्य प्रत्यक्षमिति कल्पनादस्ति नियम इति चेत् ज्ञानलक्षणया घटादेरुपनये तद्विशिष्टबुद्धेरेवोदयप्रसङ्गात् विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वेन तज्ज्ञानसामग्र्याः समवधानात् अथ अभावज्ञानसामग्र्याः प्रतिबन्धकत्वेन न तद्बोध इति चेत् अभावबोधसामग्र्याः अनियतत्वेन तस्या अप्रतिबन्धकत्वात् इन्द्रियसन्निकृष्टविशेषणतात्मकस्य स्वरूपसम्बन्धस्य भूतलादिस्वरूपत्वानतिवृत्तेः भूतलादिस्वरूपस्य कदाचिदप्यनपायेन प्रतिबन्धकत्वायोगात् अन्यथा भूतलादौ कदापि घटादेर्ज्ञानलक्षणया विशिष्टज्ञानस्यानुत्पत्त्यापत्तेः "अभावबुद्धिश्च विशिष्टवैशिष्ट्यावगाहिबोधमर्य्यादां नातिशेते" इति दीधितिकृदुक्तेरादौ प्रतियोगिज्ञानस्यापेक्षितत्वेन अभावांशे प्रतियोगिज्ञानवत् धर्म्यंशे तज्ज्ञानस्य दुष्परिहारत्वात् । एतेन योग्यानुपलब्धेस्तत्र हेतुत्वकल्पनेऽपि न निस्तारः । घटादीनामिव पटादेरपि योग्यतया तदुपलब्धेरभावस्य सत्त्वेन सर्वेषां योग्यानामभावप्रत्यक्षप्रसङ्गात् । नाप्यनुमानं तत्र प्रमाणं, तत्र व्याप्तिलिङ्गादेरभावात् । तस्यैवाज्ञाने तद्व्याप्यताग्रहासम्भवाच्च किञ्चातिरिक्ताभाववादिभिः भूतले "घटोनास्तीति प्रतीतिः सविषया प्रतीतित्वात् यत्तज्ज्ञानं तत्तत् सविषयकं यथा घटादिज्ञानमित्यनुमानप्रयोगः स्वीकार्य्यः । तत्र तदनुमानेन सविषयकत्वसिद्धावपि अधिकरणस्वरूपेणैव तद्विषयकत्वसम्भवेन उद्देश्यासिद्धेः नापि लक्षणात्तत्सिद्धिः अभावस्य निर्वक्तुमशक्यतया तल्लक्षणस्यैवाभावात् । तथा हि अभावशब्दस्य व्युत्पाद्यमानस्य भावभिन्नत्ववाचितया भावभिन्नत्वमभावस्य लक्षणं वाच्यं तच्च भेदरूपाभावज्ञानसापेक्षत्वेनान्योन्याश्रयदोषकवलितत्वेन दुर्वचम् । किञ्च भावभिन्नत्वस्य अभावलक्षणत्वे भावरूपविशेषणज्ञानशून्यकाले घटोनास्तीति प्रत्ययानुपपत्तिः विशिष्टबुद्धेर्विशेषणज्ञानाधीनत्वात्, अभावो न भाव इति वाक्यात् शाब्दबोधानुपपत्तिश्च उद्देश्यतावच्छेदकविधेययोरैक्ये घटोघटः इत्यादाविव शाब्दबोधाभावस्य सर्वसम्मतत्वात् । एतेन अभावत्वम् समवाय सामनाधिकरण्यान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकसत्त्वाभाववत्त्वमित्युक्तावपि न निस्तारः तथात्वे अभावो न भाव इति शाब्दबोधोपपत्तावपि तदज्ञानकाले घटोनास्तीति प्रत्ययस्यानुपपत्तेरन्योन्याश्रयदोषस्य दुष्परिहरत्वाच्च । घटाभावाभावादेर्घटरूपतयाऽङ्गीकारेण तत्र समवायेन सत्तावत्त्वेन निरुक्ताभाववत्त्वाभावात् घटाभावाभावोऽभाव इति बुद्धेरनुत्पत्त्यापत्तेश्च । अथ अभाववत् अभावत्वमप्यतिरिक्तः पदार्थः तथाचाभावत्वं न भावभिन्नत्वादि किन्तु स्वरूप-